काशीमोक्षनिर्णय

॥राज्ञाकृष्णशर्मनाम्नेनहृष्टआपुरवासिना मुद्रितोयंमुमुक्षूणांमुक्तरोमोक्षनिर्णयः १
उभयासहितोनेनविश्वेशःप्रीयतांसदा क्षमन्तांसूरयस्सर्वेशोधनानवधानताम् २

श्रीकाशीविश्वनाथपुरीमेंढुंढिराजगणेशकेपाससदाकृष्णअग्निहोत्रीकेसिद्धविनायक यंत्रमेंकाशीमोक्षनिर्णयछापागयालि बाबूरामसुकुलछापनेवालामान काशीजी मेंढुंढिराजगणेशपरमिलेगा।मि चैत्रकृष्ण ८ आरम्भः। सं १९४२

॥श्रीगणेशायनमः॥ नमस्कृत्यजगन्नाथंमाययाचन्द्रशेखरम् गंगाधरंगरच्छायानीलकंठमुपास्महे १ वा
राणसींपुरींपुण्यांयेऽधितिष्ठंतिजंतवः॥ व्याचष्टेतारकंब्रह्मरुद्रस्तेषांदयानिधिः॥२॥ प्राणप्रयाणसमयेप्रा
प्यज्ञानंमहेश्वरात्॥ मुच्यंतेजंतवस्सर्वेबद्धाःस्वाभाव्यविद्यया॥३॥ मो क्षस्तेषांतारतम्यंघटेतरख्योरिव॥
पुनर्देहांतरारंभकारणंनास्तिकिंचन॥ सालोक्यादेर्नविद्वद्भिःसाक्षान्मोक्षत्वमिष्यते॥४॥ उपास्तेःपरस्यता
रतम्यपदस्थितेः॥ ज्ञानाग्निनाविनष्टत्वाद्विश्लेषःपूर्वकर्मणाम्॥५॥ उत्तरेषांनविश्लेषोभवेन्मुक्तस्यजीव
तः॥ प्रारब्धंकर्मभोगेनक्षीयतेज्ञानकारणम्॥६॥ ततोविदेहकैवल्यंभवतीतिसुनिश्चितम्॥ काश्यांविदे
हकैवल्यंभवतीतिसुनिश्चितम्॥७॥ काश्यांविदेहकैवल्यप्राप्तेरुत्तरकर्मणाम् असंभवान्नविश्लेषोवेदित
व्योविचक्षणैः॥८॥ किमत्रप्रमाणंश्रूयतेहितद्यथैषीकातूलमग्नौप्रोतंप्रदूयेतएवंहास्यसर्वेपाप्मानःप्र १

दूयंतइति।। तर्हिपापकर्मणामेवविलयःश्रूयंते नपुण्यकर्मणामितिचेन्नेत्याह ब्रह्मादीनांशरीराणिश्वसूक
रशरीरवत्।। यतोजिह्मासितान्येवतस्माद्धर्मपिपाप्मगीरितिवचनात्।। पुण्यकर्मारब्धानांब्रह्मेन्द्रशरीराणांपा
पकर्मारब्धश्वसूकरशरीरादिवज्जिह्मासितत्वाविशेषात्पुण्यस्यापिकर्मणः पाप्मत्वेनकीर्तमप्युक्तं तथाच
भगवतास्मर्यते यथैधांसिसमिद्धोग्निर्भस्मसात्कुरुतेऽर्जुन ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेतथा
यच्चोक्तंजीवन्मुक्तस्यज्ञानोत्तरकालीनकर्मणांविश्लेषोनभवतीतितन्नेदंप्रमाणं।।यथापुष्करपलाश
आपोनश्लिष्यंते एवंहैवंविदिपापंकर्मनश्लिष्यतेइति।। प्रारब्धस्यचकर्मणःकर्मत्वाविशेषात् ज्ञानेनवा
ध्यत्वमुत्पद्यतेइतिचेन्नेत्याह प्रारब्धस्योपजीव्यत्वात्तत्वज्ञानेनकर्मणः।। अशक्यत्वाच्चमुक्तेषोरि
ववाधोनविद्यतेइतिवचनात्।। अथेदानींपरमप्रकृतेः प्रमाणंप्रतिपद्यते।।यमोवैवस्वतोराजायस्त

का॰मो॰ वैषहृदिस्थितः॥तेनचेद्विवादस्तेमागंगांमाकुरून्गमइतिगंगाकुरुक्षेत्रयोर्निषेधमुखेनोमुमुक्षुप्राप्य
टि॰ त्वमाहस्मभगवानार्य्योमनुः यद्वैकिंचनमनुरवदत्तद्भेषजमितिश्रुतेः॥यमःयमयतिनियमयति॥तथा
२ चश्रुतिः यआत्मनितिष्ठन्नात्मनोंतरोयमात्मानवेदयस्यात्माशरीरंयआत्मानमंतरोयमयतिएषतेआ
त्मांतर्याम्यमृतइति॥वैवस्वतःविवस्वान्पिताऽस्येतिविवस्वंतमधितिष्ठतीत्यर्थः राजाराजतेदीप्यतेस्वयं
प्रकाशते ज्योतिर्ब्राह्मणावाक्ये तंज्योतिष्ट्वंप्रत्यगात्मनः॥औपचारिकमन्यत्रभास्यत्वाद्भास्वरादि
वदितिवचनात् यस्तवैषहृदिस्थितइति स्वानुभवप्रत्यक्षत्वंदर्शयति हृदिस्थितइतिसर्वेषांभूतानांहृदे २
शेसदासन्निहितः अंतःप्रविष्टःशास्ताजनानामितिश्रुतेः॥ शास्ताविष्णुरशेषस्यजगतोयोहृदिस्थितइ
तिस्मृतेः तेनवयोहृदिस्थितस्तेनपरमात्मनाऽविवादऐकात्म्यंयदास्तितदागंगांकुरुक्षेत्रंचमागाः॥गंगायं

मरणंचैवदृढाभक्तिश्चकेशवे॥ ब्रह्मविद्याप्रबोधश्चनाल्पस्यतपसःफलमितिसमप्रधानभावेनश्रीव्यासे
नोक्तं॥ मरणेस्मरणंविष्णोःकथ्यतेऽत्यंतदुर्लभं तदस्मेनहिकालेनगंगासंसेव्यलभ्यतइति॥ यस्यतत्त्वज्ञा
नंनास्तितस्यगंगायांकुरुक्षेत्रेवायावद्देहावसानंतावत्स्थितौसत्यांतत्त्वज्ञानावाप्त्यामोक्षोभवतीतिभावः
किंनामतत्कुरुक्षेत्रंयत्रदेहावसानेसर्वस्यजंतोर्मोक्षःश्रूयतेउच्यते बृहस्पतिरुवाचयाज्ञवल्क्यंयदनु॥
कुरुक्षेत्रंदेवानांदेवयजनंसर्वेषांभूतानांब्रह्मसदनमविमुक्तंवैकुरुक्षेत्रंदेवानांदेवयजनंसर्वेषांभूता
नांब्रह्मसदनंतस्माद्यत्रक्वचनगच्छतीतितदिदंमन्येदेवानांदेवयजनंसर्वेषांभूतानांब्रह्मसदनमत्र
हिजंतोः प्राणेरुत्क्रममाणस्यरुद्रस्तारकंब्रह्मव्याचष्टेयेनासावमृतीभूत्वामोक्षीभवति तस्मादवि
मुक्तमेवनिषेवेतअविमुक्तंनविमुंचेदेवमेवैतद्याज्ञवल्क्यः॥ अथहैनमत्रिःपप्रच्छयाज्ञवल्क्यं यएषो

का॰मो॰ नंतोव्यक्तआत्मातत्कथमहमिमंविजानीयामितिसोविमुक्तउपास्यइतिसोविमुक्तः कस्मिन्प्रतिष्ठित
नि॰ इतिवरणायांनाश्यांचप्रतिष्ठितइति काचवरणाभवतिकाचनाशीभवति सर्वानिंद्रियकृतान्दोषान्वा
३ रयंतितेनवरणाभवति सर्वानिंद्रियकृतान्पापान्नाशयतीतिनाशीभवति कतमच्चास्यस्थानंभवतीति।
भ्रुवोर्घ्राणस्यचयस्संधिस्सएषद्यौर्लोकस्यपरस्यचसंधिर्भवतीत्येतद्वैसंधिंसंध्यांब्रह्मविदउपासतइ
तिसोविमुक्तउपास्यइतिसोविमुक्तंज्ञानमाचष्टेयोवैतदेवंवेदेति बृहस्पतिर्याज्ञवल्क्यंपप्रच्छयदनः
कुरुक्षेत्रंदेवानांदेवयजनंसर्वेषांभूतानांब्रह्मसदनंतस्माद्यत्रक्वचनगच्छतीति विश्वेश्वरेणाकरावि
दपिमुक्तंनभवतीत्यविमुक्तंसर्वगतत्वेपिविशेषाभिव्यक्तिहेतोः वैएवार्थः कुरुक्षेत्रंकुरुक्षेत्रशरि
नं देवानांदेवयजनं सर्वैर्देवाइज्यंतेपूज्यन्तइति सर्वैर्देवायत्रविश्वेश्वरंयजंतिपूजयन्तिवेतिदेवयजनं स

र्वेषां भूतानां ब्रह्मसदनं भवतीति भूतानि भवंति उत्पद्यंते उत्पत्तिमंति कानि तानि जरायुजांडजस्वेदजोद्भि
ज्जानि तेषां सर्वेषां भूतानां ब्रह्मसदनं ब्रह्मलोकस्तस्माद् विमुक्ताद् अन्यत्र क्वचन गच्छति यत्र क्वापि न गच्छे
त्तमो स्थार्थे सन्नांतरं स्मत्यपो वहुलमिति लकारस्यात्ययः अविमुक्तं परित्यज्य सेन्नांतरे मोक्षो न भवती
५ ति भावः तस्मिंस्तं मन्ये देवानां देवसदनं सर्वेषां भूतानां ब्रह्मसदनं तत्तस्माद् देवानां देवयजनमिदमविमुक्तं स
र्वेषां भूतानां ब्रह्मसदनं ब्रह्मलोकं मन्येऽवगच्छति अत्र हि जंतोः प्राणैरुत्क्रममाणस्य रुद्रस्तारकं ब्रह्म व्या
चष्टे॥ अत्राविमुक्ते हि प्रसिद्धो जंतोश्चतुर्विधस्य जीवजातस्य प्राणैरुत्क्रममाणस्य प्राणैरुत्क्रांतिं कुर्वतः
प्राणेषूत्क्रममाणेष्विति केचित्पठंति॥ रुद्रस्तापत्रयात्मकं संसारदुःखं रुतं दुःखहेतुर्वा रुतं रुद्रं द्रावयती
ति रुद्रः रुद्दुःखं दुःखहेतुर्वा द्रावयत्येष नः प्रभुः रुद्र इत्युच्यते सद्भिः शिवः परमकारणमिति स्मृतेः अशुभं

का॰ मो॰ द्रावयन रुद्रो यज्जहार पुनर्भवं ततः स्मृताभिधो रुद्रशब्देनात्राभिधीयते इति च रुत्यावेद रूपया धर्मादीन्वो
नि॰ धयतीति वा रुद्रः ॥ रुत्या प्रणवरूपया स्वात्मानं प्रापयतीति वा रुद्रः रोरूयमाणो द्रवति प्रविशति मर्त्यानिति वा रु
४ द्रः त्रिधा बद्धो वृषभो रोरवीति महादेवो मर्त्यां आविवेशेति श्रुतेः रोधिका बंधिका च शक्तिः रुत् तस्या द्रावयि
ता भक्तेभ्य इति वा विग्रहः रुद्रः रुतशब्दवेदात्मानं कल्पादौ ब्रह्मणे ददातीति वा रुद्रः यो वै वेदांश्च प्रहिणो
ति तस्मा इति श्रुतेः एवमादिभिः प्रकारैर्बहुधा रुद्रशब्दो निरूप्यते तारकं तारकः प्रणवस्तारयतीति तारः स्वा
र्थे कप्रत्ययः संसारसागरादुत्तारकं तारकं च तद्ब्रह्मेति तारकं ब्रह्मोच्यते ॐमितीदं तद्ब्रह्मेति श्रुतेः ॐमि
तीन्येतदक्षरमिदं सर्वमिति श्रुतेः ॐमित्येकाक्षरं ब्रह्मेति भगवान्व्याचष्टे उपदिशति येनासावमृती भूत्वा ४
मोक्षी भवति येनोपदिष्टेन ज्ञानेनासौ जंतुरमृती भूत्वेत्यन्वयः अमृतत्वं तद्भावे च्विनेभवति स्वतः सिद्धत्वात् अमृ

तोयमविद्यां तर्हितो मर्त्यभावमापन्नो निवृत्ताऽज्ञानतत्कार्यो मोक्षी भवति मुक्त एव मुक्तो भवति ब्रह्मैव सन्ब्र
ह्माप्येति विमुक्तश्च विमुच्यत इति श्रुतेः तस्मात्तोहेतोरविमुक्तमेव निषेवेत अविमुक्तं न विमुंचेन्न
त्यजेदामरणांतिकं एवमेवैतद्याज्ञवल्क्यो बृहस्पतिना पृष्टः सन्नेवमेवैतद्वगंतव्यमित्युवाच याज्ञव
ल्क्यः प्राणोत्क्रमणं न स्थावरविषयमिति चेन्नेत्याह ओषधिवनस्पतयो यच्च किंच प्राणभृदिति श्रुतेः
यत्किंचेदं प्राणि जंगमं च पतत्रि च यच्च स्थावरं सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितमिति श्रुतेः प्राणोत्क्रमणं
जंगमेष्वभिव्यक्तं स्थावरेष्वनभिव्यक्तमेतावानेव विशेषः भूतानां प्राणिनः श्रेष्ठा इति मानववाक्यम
पि प्राणाभिव्यक्त्यभिप्रायं प्राणित्वप्रतिपादनपरं षड्भावविकारत्वाविशेषात् प्राणित्वाविशेषात्स्थू
लकारणोपाधिमत्त्वाविशेषात्॥ जंतुशब्दत्वाविशेषात्संसारचक्रे भ्राम्यमाणत्वाविशेषात् तथास्मर्यते

का॰मे॰ स्यास्यां विपच्यमानायां पापवादीनां पथैव हि सुराणां नारकाणां च तथोर्ध्वाधः प्रवर्तनमिति अत्राविमु
नि॰ क्ते स्थावरजंगमाख्य सर्वप्राणिनो मोक्षे धिक्रियंते संकोचे कारणाभावात् अभ्यस्य ब्रह्मसदनं श्रुत्या तारय
५ येष्ठुक्तया सर्वस्य वोध्यते जंतोर्मुक्तिरेकेन जन्मना तेब्रह्मलोकवाक्येन ब्रह्मलोकगता जनाः पंथास्सर्वे वि
मुच्यंते तथैवात्रापि जंतवः तत्र ब्रह्मोपदेष्टा स्याद्ब्रह्म साक्षान्महेश्वरः तस्यापि परमाचार्यो यो ब्रह्माणमिति
श्रुतेः अथैनमत्रिः पप्रच्छ य एषोनंतोव्यक्त आत्मा कथमहमिमं विजानीयामिति सोविमुक्त उपास्य इ
त्युवाच याज्ञवल्क्यः सोविमुक्तः कस्मिन्प्रतिष्ठित इति अत्रिः पप्रच्छ वरणायामस्यां च मध्ये प्रतिष्ठित इत्यु ५
वाच याज्ञवल्क्यः वरणायामस्यामित्यत्र विभक्तिव्यत्ययेन षष्ठी ज्ञातव्या का च वरणा भवति का च नासीति अत्र
त्रिः पप्रच्छ सर्वानिंद्रियकृतान्दोषान्वारयतीति वरणा भवति सर्वानिंद्रियकृतान्पापान्नासयतीति तेन नासी त्युवा

चयाज्ञवल्क्यः सर्वानिंद्रियकृतानित्युभयमन्नसर्वानिंद्रियकृतान्पापानितिलिंगव्यत्ययोबोध्यः वार
यतिनिवारयतीतिवारणा अस्यतिनिरस्यतीत्यसिः सर्वानिंद्रियकृतान्पापान्नाशयतीतिनाशीतिके
चित्पठंति स्पष्टमन्यत् कतमच्चास्यास्थानंभवतीत्यत्रिःपप्रच्छ भ्रुवोर्घ्राणस्यचःसंधिरित्युवाचया
ज्ञवल्क्यः अत्रघ्राणशब्देनघ्राणवायुप्रचारकंघ्राणमूलमुच्यते वाराणसीभ्रुवोर्मध्यमविमुक्तंतयोर्भ्रु
वः अध्यात्मेवातिदिष्टंतद्भ्रुवोर्घ्राणस्यचांतरमिति भ्रुवोर्मध्येप्राणमावेश्येतिभगवद्वाक्यमपि अविमु
क्तेप्राणान्परित्यजतःपरब्रह्मप्राप्तिंप्रतिपादयति दिवःपरस्यलोकस्यसंधिंसंध्येतिचोच्यते सैवसं
ध्याविमुक्ता स्मात्तत्रेश्वरमुपासते सगुणब्रह्मवेत्तारस्तेषांज्ञानंसईश्वरः आचष्टेचाविमुक्तास्तेयप
एतस्यैवसेवकाः जीवेश्वरविभागश्चप्रसंगात्प्रतिपाद्यते प्रकृतस्योपयोगित्वाच्छास्त्रदृष्टेनवर्त्मना

का॰मो॰ ष्टेःप्रागभावात्सच्चिदानंदबोधरूपमखंडमद्वितीयंपरंब्रह्मैकमेवजागर्त्तिनान्यत्किंचिदस्ति तथाचश्रू
नि॰ यते आत्मावाइदमेकएवाग्रआसीन्नान्यत्किंचनमिषदिति सदेवसोम्येदमग्रआसीदेकमेवाद्विती
६ यंब्रह्मेतिच तन्मायायाद्वैरूप्यंप्रतिपद्यते मायाचकार्यकारणरूपेणद्विरूपा कारणोपाध्युपहितंतच्चै
तन्यंतत्सर्वज्ञंसर्वशक्तिसर्वेश्वरंजगत्सृष्टिस्थितिप्रलयकारणंभवति कार्योपाध्युपहितंयच्चैतन्यं
तज्जीवसंज्ञमल्पशक्तिसंसारिपरतंत्रंभवति कार्योपाधिषुजीवशरीरेषुकारणोपाधीश्वरस्यकार्येषु
कारणानुवृत्तेरधिष्ठातृत्वमुपपद्यते द्वासुपर्णासुयुजासखायाइतिश्रुतेः पर्यायत्वमविद्यायामा ६
यायाश्चतथापरे प्रयोगेषुप्रसिद्धत्वान्मन्यंतेलोकवेदयोः शक्तिरूपमविद्यायाः कल्पयंतिचतेततः
स्वाश्रयामोहिनीकाचिन्मोहिनीमपरामपि तमोमोहोमहामोहस्तामिस्रोह्यंधसंज्ञितः अविद्यापंचपर्वै

मायाप्रादुर्भूतामहात्मनः ब्रह्मदेवमनुष्येषुपशुषुस्थावरेषुच पंचधायाविमुक्तान्मावर्ततेचिरयाश्रया
तामविद्यांतथाभूतांभगवान्परमेश्वरः संहरत्युदयेनैवसहस्रांशुस्तमोयथा ॥ जन्तोरन्नहिप्राणोत्क्रम
माणस्यरुद्रस्तारकंब्रह्मव्याचष्टेइत्यस्यायमर्थः वाराणसीमध्यवर्तिनांमनुष्यव्यतिरिक्तानांजंगमा
नांस्थावराणांचवाराणसीप्राप्तिस्थितिप्रलयकारणानांपुण्यकर्मणांभूयस्त्वात्प्रारब्धेनशरीरेणक्रिय
माणयोः पुण्यपापयोरसंभवात्प्रारब्धस्यकर्मणोभोगादेवपरिक्षयात् प्राणप्रयाणसमयेसर्वज्ञःसर्वश
क्तिस्सर्वान्तर्यामीपरमकारुणिकःपरमेश्वरःस्वतःसिद्धमात्मरूपमविद्याप्रहाणाऽभिव्यंजयतिस्व
गमयतीत्यर्थः तथाचश्रूयते योदेवानांप्रथमंपुरस्ताद्विश्वाधिकोयोरुद्रोमहर्षिर्हिरण्यगर्भंपश्यति जा
यमानंसनोदेवःशुभयास्मृत्यासंयुनक्तीतीश्वरस्यसर्वशक्तिमत्त्वंचश्रूयते नतस्यकार्यंकारणंचवि

का॰ मो॰ द्यतेन तत्समश्चाभ्यधिकश्च विद्यते परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति म
नि॰ नुष्येषु ये जीवन्मुक्तास्तेषां प्राणोत्क्रमणं नास्ति न तस्य प्राणा उत्क्रामंत्यत्रैव समवलीयंत इति श्रु
७ तेः ते यत्र क्वापि निवसंतः प्रारब्धकर्मक्षये विदेहकैवल्यं प्राप्नुवंति ये च सगुणब्रह्मोपासकाः ये
च केवलं फलनिरपेक्षाः संतः कर्मानुष्ठानारब्धोपासकाः ये च केवलं निरपेक्षाः संतः श्रुतिस्मृत्युक्त
स्ववर्णाश्रमोचितकर्मानुष्ठानास्तेषां चत्वारिंशत्संस्कारैरशेषैरसंस्कृतत्वेपि अष्टभिरात्मगुणैर्युक्ता
नां प्राणप्रयाणसमये पूर्वोक्तन्यायेन भगवान्परमेश्वरस्तारकं ब्रह्मोपदिशति अन्येषामप्यशेषाणां गंगा ८
वगाहनदर्शनाभ्यां यज्ञदानतपोभिश्च यादृच्छिकैः पुराकृतैः कर्मभिः सुकृतैः उखरः पुण्यपापानां धन्या
वाराणसी पुरी इदं प्रियेक्षेत्रमतिप्रियं मे संसारजीवोखरमूखराणां इति वचनाभ्यामूखरत्वेन प्रसिद्धे क्षे

र्थः अन्यथाप्रत्यक्षश्रुतिविरोधात्प्राणोरुत्क्रमप्रमाणस्येति वर्तमानार्थविहितप्रत्ययसामान्यात् मुक्तिरे
केनजन्मनेतिवचनात् अत्रैवमृतमात्राणामितिमात्रच्प्रत्ययप्रयोगप्राबल्यात् नचातोऽव्यवधानेवं
तोनिवारणासौमुक्तेः कालान्तरव्यवधानाश्रवणात् श्रुत्यर्थानुगुणानामन्येषामपिवचनानांभूयसांसं
भवात् प्रमाणवंत्यदृष्टानिकल्प्यानिसुबहून्यपिवालाग्रशतभागोपिनकल्प्योनिःप्रमाणकइतिन्याया
त् पीनोदेवदत्तोदिवानभुंक्ते इतिवाक्येरात्रिभोजनमंतरेणपीनत्वानुपपत्तेर्यथारात्रिभोजनंकल्प्यते
तथैवात्रापिश्रुतिस्मृत्यन्यथानुपपत्त्यामुक्तिरेकेनजन्मनाजंतोरेष्टव्या जाग्रत्स्वप्नयोःकर्मफल
भोगेनकश्चिद्विशेषोस्ति तस्यत्रयआवसथास्त्रयःस्वप्नाइतिश्रुतेः मायाविमोहितानांक्षणेनैकेनभ ८
विग्रहान्तरपरिग्रहाविचित्राश्चानुभवाःस्मर्यंते उक्तंचवाशिष्ठे यथास्वप्नमुहूर्तेस्यात्संवत्सरशतभ्रमः

8

त्मप्रभावेणचनष्टावशिष्टपापकर्मणः काम्यस्यपुण्यकर्मणोमुक्तिरेकेनजन्मनेतिमुक्तेरवश्यंभावि
त्वात् प्रारब्धएवशरीरेभोक्तव्यत्वोपपत्तेरतुल्यकृतैः पुण्यपापैरिहैवफलमश्नुतइतिवचनात् काश्यां
कृतयोः पुण्यपापयोरुत्कटत्वाद्वर्तमानएवशरीरेभोक्तव्यनियमाच्चानयोः पुण्यपापयोः फलदानाय
ईश्वरस्सर्वभूतानांहृद्देशेऽर्जुनतिष्ठति मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरमितिवचनात् मायावीप
रमेश्वरः प्राणप्रयाणसमयात्पूर्वंस्मरणेनैकेनानेककालीनेष्टानिष्टकर्मफलोपभोगयोग्यशरीरांतरानु
प्रवेशंमाययैवाज्ञाप्येष्टानिष्टान्स्वप्नकल्पान्भोगाननुभाव्यपश्चात्पूर्वोक्तन्यायेनतारकंब्रह्मोपदिशती।
त्यवश्यमेवाभ्युपगंतव्यं तथाचसूतसंहितायाम् ईदृशीपरमानिष्ठागुरोः साक्षान्निरीक्षणात् कर्मसा
म्येत्वनायासात्सिद्ध्यत्येवनसंशयः कर्मसाम्येकर्मणोः सुकृतदुष्कृतयोः फलभोगेनक्षयसाम्येसतीत्य

का·मो राजकन्यासमभवत् तस्याः पाणिं किरातः कश्चिद्गृहीत् साच पुत्रान्बहून्प्रासूत पौत्रांश्चापश्यत्सा
नि कदाचिदुदकाहरणाय गंगातीरमुपासीत्किरातजातिस्वाभाव्याद्दासः कुंभं च तीरे निधाय गंगायां प्रावि
९ शत् प्रविष्टमात्रास्तेनैकेन स एव मुनिरभवत् विलंबितां तामालक्ष्य तद्भर्तृपुत्रसंबंधिबांधवास्तीरे
ग्रामागत्य वासः कुम्भं तदीयं दृष्ट्वा गंगाप्रवाहेणासानीतेति निश्चित्य महांतं प्रलापं चक्रुः ततस्तेन मु
1 निनासोहमस्मीति प्रबोधिताः भ्रांतिस्थानाभवन् अथ विज्ञानैर्बहुभिः प्रबोध्यमानाः यथागतं
सत्यमित्यमेवैतदिति शोकं परित्यज्यागच्छन्निति वाराहपुराणे तथास्तवणाख्यो राजा कश्चिन्म
त्रिसामंतनृपतिभूपस्यां सभायां सिंहासनस्थो मायाविना केनापि विमोहितस्तदा तां मायां दर्शितम ९
श्वरत्नमधिरुह्य समस्तां पृथिवीं बभ्राम अथ जविनातेन पातितः कस्मिंश्चिद्द्विजनैः शापिष्ट सुदृषा

तथामायाविलासोत्थो जायते जाग्रति भ्रमः उक्तं च संक्षेपशारीरके सुप्तो जंतुः स्वल्पमात्रेपि काले को
टीः पश्येद्वृत्तसंवत्सराणां कोटीः पश्येद्देवमागामिकानां जाग्रत्काले पाजयेत्सर्वमेतत् शैवागमेपि क
पालमिन्दुः कश्चिद्धर्मनागाः काशीपुरीकंठगतस्य जंतोः मूर्च्छासु मूर्च्छासु परिस्फुरंति संज्ञासु संज्ञासु तिरोभ
वंति काशीखंडेपि कृत्वा कर्माण्यनेकानि कल्याणानीतराणि च तानि क्षणात्समुत्सृज्य काशीं सं।
स्थो मृतो भवेत् महापापौघशमनीं पुण्योपचयकारिणीम् भुक्तिमुक्तिप्रदां मत्वा को न काशीं सुधीः श्र
येदिति पुराणांतरेष्वपि स्मर्यते तथाहि भगवन्मायाविमोहितः कदाचिन्नारदः कन्यात्वमवाप तां
कश्चिदुद्वाहयत्तदा पुत्रान्बहूनजनयत् सांसारिकं च दुःखमनेककालीनमन्वभूद्भर्तुः पुत्राणां च
वियोगायेन शोकेन पुनर्नारद एवासीदिति स्कंदपुराणे गंगातटे वसन्कश्चिन्मुनिर्मायाविमोहितः कि

का॰मो॰ लि॰ १०

त्पिपासितैः शिशुभिः प्रार्थ्यमानस्तेभ्यस्तत्रान्नं तद्दातुमुपायं कंचिदलभ्यमानस्तेषामार्तिपरवशं वचसो
ढमशक्नुवन् बलादेधांस्याहृत्य सन्निपात्य प्रज्वाल्य पावकं शरीरमेतं भस्मयंतीति क्षुध्याज्वालाजटिल
मग्निं प्राविशत् ततः क्षणादुन्मील्याक्षिणी विस्मयाविष्टः क्षणेनैकेन तद्वृत्तं मंत्रिसामंतनृपतिभ्यः।
कथयामासेति कथा वासिष्ठरामायणे एवंजातीयकाः संत्यन्याश्चानेकशः कथाः एवमुक्तप्रकारेण क
ल्पानामपि केषांचित्स्मर्यमाणः शरीरांतरप्रवेशः कालभैरवयातनाद्यनुभवश्च मायामय एवेत्यभिज्ञैरवगंत
व्यं अयमर्थः सनत्कुमारसंहितायां स्पष्टः अत्रैव पापैः सह चेन्मृतोसौ न जन्ममृत्यू लभते त्ववश्यं ॥
कालेन मे यामगणैः फलेषु नियोजितस्तत्सकलं प्रभुज्य अल्पेन कालेन समस्तमेव सांर्थपुराण १०
द्रपिशाचरूपैः भवप्रसादेन कृतोपदेशः पिशाचयोनेरपि मुक्तिमेति यथात्र पुण्यं प्रकृतमक्षयं स्यात्तथात्र

परीतश्चायमरण्येव्यापारंकिंचित्कुर्वतःपितुःकृतेपानीयमन्नंचादायगच्छन्तींचांडालकन्यका

मपश्यत् तदंतिकमुपसृत्याब्रवीत्क्षुत्पिपासार्दितस्यमेस्तोकमन्नंपानीयंचदेहि इतिसाचैन

मुवाचत्वंचेन्ममभर्ताभविष्यसितर्हिदास्यामीतितथेत्यभ्युपगम्यत्वथैकदेशस्थमन्नमभक्षयत् पा

नीयंचापिबत् ततःसातंपितुरंतिकंनीत्वावृत्तांतमावेद्यतेनानुज्ञाताभाविनाभर्त्रासाकंस्वभवनमया

सीत् मातृभ्रातृभगिनीनांचैनमदर्शयत् तेचतास्थेनमभ्यनंदन्नमंसततांचोद्वाहविधिनापर्यग्रहीत्

तयासहचिरकालमुवास तस्यांपुत्रान्बहूनुदपादयत् अथपुनःकालेनगच्छतादुर्भिक्षोपहतस्त

स्माद्देशात्तयाभार्ययाताभिश्चप्रजाभिःसार्द्धंदेशान्तरमयासीत् सकदाचिन्निर्जलप्रदेशेकस्मिंश्चिद्वृ

क्षमूलेक्षुत्पिपासार्दिताभिःप्रजाभिर्भार्ययाचसार्द्धंपरिश्रांतोऽशयिष्ट तातान्नंपानीयंचदेहीतिक्षु

पापंनतयोर्विशेषइतिश्रुतिनिंदार्थवादः अन्यथासर्वेषांमनुष्याणांपुण्यपापयोरल्पयोर्वासंभवा
त्तयोरस्यपश्चुत्वंगोकारेणकस्यापिमुक्तिःस्यात्तदत्रमुक्तिप्रतिपादकयोः श्रुतिस्मृत्योर्वैयर्थ्यंस्यात्।
अतोहेतोःकाश्यांकिंचित्कालंउषित्वाबहिर्गत्वायोम्रियतेतेनतद्विषयेभवतीत्यवगंतव्यं वाराणस्यांकृ
तंपापंवज्रलेपोभविष्यतीत्यपिवचनंतथैवमंतरंपापकर्माकश्चित्काश्यांम्रियते पुण्यकर्मावहि
र्म्रियतेइतिनैवंविज्ञानवद्भिर्विचारणीयम् एकस्मिन्नेवजन्मनिपुण्यपापयोःपरिच्छेत्तारोवयमना
दौसंसारेमनोवाक्कायैःपुण्यपापयोःपरिच्छेत्तापरमेश्वरः तथाचब्रह्मवैवर्त्तेस्कंदेनोक्तमगस्त्यंप्रति
नज्ञायतेसूक्ष्मतरंहिकिंचित्कर्मास्तिलोकस्यसुदुर्विभाव्यं योगादियज्ञादितपोभिरुग्रैर्युक्तस्यतेसं
प्रतिनास्तिकाशी नज्ञायतेकस्यकिमस्तिपुण्यंस्वल्पोपिकाश्यांतनुभृत्सदास्ते॥ देवास्योपिप्रभवंतिने

वस्थांतुंस्वर्णांकाशिकायांकुर्वीइति कृतमपलापेस्सत्तारकंब्रह्मोपदिशतीत्यवगंतव्यं अंतर्वहिः क
रोतीतिचप्रतिनियतैववस्तुशक्तिः यथाग्नेर्दाहकशक्तिस्तथाकाश्यांमोचकशक्तिःप्रतिनियतैव यथाम्बु
नोपयोवाहातप्रतिनाजलविंदवः मुक्ताःस्युस्तथाकाश्यांसंस्थितास्सर्वेपिजंतवः कीटाःपतङ्गाःपशव
श्चवृक्षाजलेस्थलेपिविचरंतिजीवाः मंडूकमत्स्याः कृमयोपिकाश्यांत्यक्त्वा शरीरंशिवमाप्नुवंति पुण्या
निपापान्यखिलान्यशेषंसार्थंसबीजंसशरीरमार्ये इहैवसंहृत्यददातिबोधंयतःशिवानंदमवाप्नुवंति
सूच्यग्रमात्रमपिनास्तिममास्यदेसिंन्स्थानंक्षेत्रेभ्वरिमृतस्यनयत्रमोक्षः भूमौजलेवियतिवाऽस्तुचिमे
ध्यतोवासर्पाग्निदस्युपविभिर्निहतस्यजंतोः स्थिराकाश्यामिहैवैकाप्रतिज्ञाहिमयाकृता अत्रैवमृतमा ११
त्राणांतिरश्चामपिदेहिनां भक्तानामप्यभक्तानांपुण्यपापात्मनामपि मुक्तिंदास्यामिसर्वेषांभक्तानामेव

सावह्निः विनापियोगैश्च विनापिपुण्यैर्विनापिदानैस्सहितोपिपापैः मृतः प्रयात्येवहियत्रतत्रमामे
वनिर्दग्धसमस्तदोषः अत्रसाक्षान्महादेवोदेहांतेस्वयमीश्वरः व्याचष्टेतारकंब्रह्मजन्तूनामपवर्गदः
सनत्कुमारसंहितायाम् महात्मनांशान्ततपोधनानांशापोमुनीनामपियत्रभग्नः॥ तत्सैन्यमासाद्यमहानि
धानंवणीजनोप्यत्रवसन्कृतार्थः योगोत्रनिद्राकृतवः प्रचाराःस्वेच्छाऽशनंदेविमहानिवेद्यंलीलात्म
नोदेविपवित्रदानंजपःप्रजल्पःशयनंप्रणामः मोक्षंसुदुर्लभंमत्वासंसारंचातिभीषणं अश्मनाच
रणौहत्वावाराणस्यांवसेन्नरः इदंकलियुगंघोरंसंप्राप्तेपांडुनंदन गतिमन्यांनपश्यामिमुक्त्वावाराण
सींपुरीम् जपध्यानविहीनानांज्ञानविज्ञानवर्जिनां तपस्युत्साहहीनानांगतिर्वाराणसीनृणां अस्यत्य
सिवारयंतिप्रवेशेकर्माणिजंतोर्वरणावरण्या वाराणसीमध्यगतातयोश्चनिश्शेषपन्पूरवरताप्रभवात् अनि

रमुदयमाद्यं धाममवामार्द्धकांतं स्वमहिमरसिकं यत्स्वानुभूत्यैकमानं अनघरतमपारब्रह्मतमात्मावबोधं।
प्रकटयति पशूनां कालपाकेन काश्यां जन्मान्तरसहस्रेषु मोक्षो लभ्येत वा न वा इहैव लभ्यते जंतोर्मु।
क्तिरेकेन जन्मना गर्भाधानाद्यखिलमपि यत्कर्मजातं द्विजानामेकं न्यूनं मुनिमपि मुने पातयिष्यत्यवश्यं॥
नो चेत्स्वर्गादिषु फलमदः सर्वशास्त्रेषु सिद्धं तस्मात्काश्यां कथमपि वसेद्बुद्धिमान्मुक्तिसिद्ध्यै काशिः श्रीम
ति सर्वकर्मशमनी स्वाभाविकी काञ्चन प्रत्यक्षं तव शक्तिरस्ति महती मातर्महीमण्डले ॥ यत्स
र्वत्र सदावसन्नपि शिवस्त्वय्येव लब्धास्पदं विश्वं तारयते विशेषविमुखः पारं भवांभोनिधेः आब्रह्मणो
नंतभवेषु पुण्यं मज्ज्ञानतोपार्जितमल्पमल्पं न तद्वशाद्यद्य विमुक्तमेकं कदाचिदायाति मम प्रसादात् तीर्था।
नि सर्वाण्यपि मोक्षदानि श्रुतानि सर्वेष्वखिलेषु राजन् वाराणसीप्राप्तिफलानि शीघ्रं कालेन चान्तो ह्यथवा।

ध्यानवंति यत्राचार्यस्त्रिपुरविजयी साधनानां चतुर्णां संपन्नाः सुलभमशनं स्वैरचारस्तपांसि श्रोतव्यस्य श्रु
तिरपि तपः श्रूयते जन्मभाजां काले काश्यां सुकृतधनिकास्तत्र वा संलभंते जन्मांतरसहस्रेषु संचितैः पु
ण्यकर्मभिः प्राप्ना वाराणसी रम्या प्रसादात्परमेश्वरात् ये काश्यां संश्रया विश्वा मुक्तास्तेषां शरीरिणाम्॥
प्राणप्रयाणसमये प्रमाणं परमेश्वरः मोक्षस्य निर्णयः काश्यामित्यमेकेन जन्मना सर्वेषामेव जन्तू
नां प्रमाणैः प्रतिपादितः किं बहूक्तेन येन केनापि यः कश्चिन्निमित्तेन परित्यजेत् काश्यां प्राणान्सर्वेजं
तुर्मुक्त इत्यवगम्यताम्॥ इति श्रीसुरेश्वराचार्यविरचितः सकलश्रुतिस्मृतिनिर्द्धारितः काशीमोक्षनि १३
र्णयस्समाप्तः॥ विश्वेश्वरो जयति विश्वविमुक्तिहेतुः काशीनिवासरसिकः करुणासमुद्रः यत्पादप
द्मयुगसौरभस्नापितस्य जंतोर्भवत्यकृतकं शिवसामरस्य॥१॥

13

काशीमोक्षनिर्णय

श्रीकाशीविश्वनाथपुरीमेढुंढिराजगणेशपरदाऊजीकेछापखानेमे काशी
मोक्षनिर्णयपहस्तुश्रीमहाराजबहादुरं छपाया संसारकेलीये ॥ समाप्तः
संवत १९४० मि॰ चै॰ कृ॰ ३० ॥